कम्बल इत्यते अन्ये च बहवो बुद्धवेशस्तिष्ठन्ति, न ते लोके कदापि बुद्धनाम्ना परिचाययितुं शक्नुस्तर्हि भवान् किं न लज्जते अहं बुद्ध इत्यात्मानं परिचाययितुम्। बुद्धस्तम् ‘कुमार-दृष्टान्तसूत्रं, श्रावयामास तेनोन्मीलितचक्षुः शिष्योऽभूत्तस्य ततः प्रसेनजित् कोशलराजः। दीक्षिते राज्ञि कोशलेश्वरे बुद्धः शुद्धोदनाय संवादं प्रेषयामास “राजन्! पुत्रस्ते ययाविदानीं मृत्युनिवारणमन्वतम्। तेनैव सोऽखिलस्य जगतस्तृष्णां पापीयसीं वारयामास, शुद्धोदनः शाक्यपतिराकर्ण्य वृत्तान्तं परां मुदमवाप। आनेतुं पुत्रं कपिलवस्तुनगर्य्यामस्मै दूतं पुनः पुनः प्रेषितवान् यो यः प्रयाति दूतोऽस्य सकाशं न स पुनः प्रतिनिवृत्तः स्थितोऽस्य दीक्षितस्तत्रैव। शुद्धोदनः साधुं कालुदायीतिनामानं पत्रेण सह प्रेषितवान्। उदायी शाक्यमनादङ्गीचकार यदि चाहं दीक्षितोऽप्यभविष्यम् वारमेकमपि प्रतिन्यवर्त्तिष्ये। उदायी बुद्धस्य समीपं गत्वैव दीक्षितः। बुद्धस्तं प्रतिज्ञापरिपूरणाय शुद्धोदनस्यान्तिकं प्रेषयामास। उदायी गत्वाह राजानं भो भूप! देवो बुद्धोऽत्राजिगमिषुर्नत्ववस्थातुमिच्छुर्नगर्य्याम् विहारेऽवस्थातुमियेष सः। राजा जेतवनस्यमिव न्यग्रोधारामं कपिलवस्तुनगरे विरचय्यागमनमस्य प्रतीक्षाञ्चक्रे। तत्रागत्य बुद्धो न्यग्रोधारामे तस्मिन्नुवास। अथागत्य पितृव्यौ शुद्धोदनोऽमृतोदनश्चास्य लक्षं लक्षं शाक्यसन्ततयश्च शिष्या अभूवन्। तत्रावस्थानसमये बुद्धस्य पालयित्री गौतमी वनिता यशोधरा च भैक्षाश्रमं गृहीतवत्यौ पुत्त्रोऽपि राहुलोऽजातकनिष्ठो जनकेन दीक्षितः।

ततो बुद्धो गृध्रकूटमागत्य वसतिञ्चक्रे। समयेऽस्मिन् देवदत्तोऽस्य ज्ञातिजः शत्रुः शिल्पिनं दाक्षिणात्यादानिनाय। तेन च निहन्तुं बुद्धं कूटयन्त्रं निरमायि। अनेनाहतो बुद्धो यथा प्राप निक्षेपणावसरे यन्त्रस्य तं बुद्धं रिरक्षिषुः कुम्भीरस्तत्प्रहारेण प्राणांस्तत्याज।

कालेऽस्मिन् विम्बसारे मागधे पञ्चत्वं गते अजातशत्रुर्लब्धो दुर्द्दान्तो मगधं शशास, देवदत्तोऽस्य मित्रमासीत्। एकदाजातशत्रुर्बुद्धसन्निधावागत्य पप्रच्छ “नानाकर्म्मसु आसक्तो मनुष्यो धनमभीष्टमुपार्ज्जयितुं यतते, प्राप्य तु वाञ्छितं धनं सुखी च भवति, धर्म्मं तथा तु निधाय मनस्तद्रूपं सुखं प्रत्यक्षमाप्नुयात् किम्? बुद्धः प्रत्युवाच किं कर्म्मणा यागेन होमेन वा। न्यायान्यायौ विफलौ अधमानासुत्तमानाञ्च तिरस्कारपुरस्कारौ च तद्वन् निष्फलौ। पितरौ नात्मीयौ च योऽस्मिन् जगति प्राप्तवान् महासत्वम्, सत्वे पथि प्रविष्टवांश्च जानाति स एव जन्मैव मृत्युरिति। सोऽस्मिन् जन्मन्येवाक्षयोऽव्ययो निर्व्वाणं मोक्षं लभते न पुनरायाति सः। पृथिव्यादिभूतचतुष्टयेऽस्य यथाक्रमं भूतान्यैकीभवन्ति। इत्थमुपदेशेन बुद्धस्य अजातशत्रोर्मानसं तत् क्षणादेव प्रवणं बभूव। योऽस्य जुगुप्सापात्रमासीत् स इदानीं भक्तिपात्रमस्याभूत्। अजातशत्रुर्बुद्धाद् दीक्षां जग्राह।

गृध्रकूटाद्बुद्धः पाटलीग्राममाजगाम। कपिलनामात्र साधुर्ब्राह्मणोऽनेन व्यलोकि। सम्भाष्य तं पथि गच्छन्नसौ चतुर्द्दिशं निरीक्षाञ्चक्रे, आनन्दोऽस्य परिचरो जिज्ञासयामास किमित्थं निरीक्षसे व्यापारयंश्चक्षुषीति। बुद्ध आह आनन्द! परिहास्येऽहमिमं लोकमिदानीम्। ततः स आम्रग्रामं जम्बुग्रामं भण्डग्रामं हस्तिग्रामम् अन्यांश्च वृजिनां मल्लानाञ्च ग्रामानतिक्रम्य भोजनगरं प्राप्तः। स्थानादस्मात् अलुकाख्यमहावनमागत्यावस्थितः। अत्र कुण्डनाम्नो धातुगालकाद् वणिग्विशेषादाहार्य्यं गृहीतवान्।

ततोऽसावानन्दं सम्बोधयामास भो नगरीं कुशीं गन्तास्मि। अतःपरं तथागतो नगरीं पावामतिक्रम्य नदीं हिरण्वतीं तीर्त्वा निविड़ं वनमेकं प्राप्तः। अथानन्दं प्राह पार्श्वयोरहन्तीव्रवेदनया समाक्रान्तोऽस्मि, अतोऽहमत्रैव तिष्ठामीति। आनन्दो जलमानिनाय प्रक्षाल्य पादौ बुद्धो ध्यानं समालम्बे। कालेऽस्मिन्नागत्य पुकशो मल्लराजः पादौ बुद्धस्य प्रपूजयामास। बुद्धोऽस्य दीक्षां चकार। सोऽस्मै दत्तवान् सौवर्णानलङ्कारान् प्रणम्य च प्रस्थितः। गते मल्लराजे आनन्दं प्राह बुद्धः प्रेयान् मे आनन्द! त्वं परिधापयालङ्कारान् सौवर्णानङ्गेष्विति। तथानुष्ठिते तदानीं देहस्य ज्योतिषास्याखिलं जगद् व्यालोकितमिवासीत्। भक्तिभरेणानन्दः प्राह भगवन्! न दृष्टं कदापि मयात्रभवतामेतादृशमौज्ज्वल्यं देहस्य। दयस्व तावत् कथय कारणञ्चात्रेति। चकार प्रत्युत्तरं बुद्धो देवो निबोध आनन्द! निर्व्वास्यतः प्रदीपस्य शिखेवाङ्गकान्तिर्मे व्युत्क्रान्तेत्यत्र कारणम्।

अनन्तरमुभौ मिलित्वा हिरण्वत्यास्तीरे आजग्मतुः। बुद्धस्तत्र स्वीयं समस्तं परिच्छदं परिहायैकवसनो नद्या हिरण्वत्याः कुशायाश्च नगर्य्या उभययोर्मध्यदेशस्थं वनं विविक्तं विवेश। पथि प्राह चानन्दं क्लान्तस्य मे शय्यां विधत्स्वेति। आनन्दः शय्यां सज्जीचकार, सुप्तोत्थितो बुद्ध आनन्दाय भिक्षुकाणां कर्त्तव्यं सूत्रान्तं विनयं मातृकादीनि धर्म्मतत्त्वान्युपदिदेश। आनन्दस्तत्सर्व्वं समाहितेन मनसा जग्राह। तत आनन्दमादिदेश सालमहिरुहयोर्मध्ये शय्यां स्थापय निशीथेऽद्य मे शेषं विजानीहीति। ततो बुद्धस्तत्रैव समाधिमाधाय ह्यपार्थिवं ज्योतिरवलोकयामास ततोऽसौ चिन्तयति स्म निर्व्वाणम्।

भक्तः परमानन्दो रुरोद गाढं संज्ञायास्य विगलितश्चाश्रुप्रवाहोऽविरलधारया तमाह बुद्ध आनन्द! संसारोऽयमसारः सारो निर्व्वाणमेव तदर्थं यतस्वेति। इत्थं परमकृपालुर्बुद्धदेवो निर्व्वाणं प्राप।

इत्थं स हरेरवतारः—

“विकीर्य्य विज्ञानमयीं प्रभां प्रभु-
र्जगत्प्रदीपः प्रथितः प्रभाकरः।
बुद्धः स राशिर्महसां महोज्ज्वलो
ज्वलंश्च निर्व्वाणपदं परं गतः॥
प्रक्षाल्य त्रैलोक्यमलं मलीमसं
प्रवृद्धहिंसारसदूषितं विभुः।
प्रबोधधाराधरभूरिवारिभी
रराज देवो भुवि बोधभास्करः॥”

कुशीनगरस्थिते मुकुटबन्धनचैत्येऽस्य शिष्याः देहं भस्मीभूतं चक्रुः। शिष्यव्यूहेनास्य पवित्रदेहभस्मावशेषार्थं विवदमानेन निरणा भस्मभिरेभिरष्टप्रदेशेष्वष्टौ चैत्या निर्म्मिता भवन्त्विति॥)

बुद्धदर्शं, क्ली, (बुद्धं स्तूपाकारतो ज्ञातं दशम्।) स्तौपिकम्। लोत् इति भाषा। इति त्रिकाण्डशेषः॥

बुद्धिः, स्त्री, (बुध्यतेऽनयेति। बुध्+क्तिन्।) निश्चयात्मिकान्तःकरणवृत्तिः। इति वेदान्तसारः॥ सविकल्पकज्ञानम्। इति चण्डीटीकायां नागभट्टः॥ तत्पर्य्यायः। मनीषा २ धिषणा ३ धीः ४ प्रज्ञा ५ शेमुषी ६ मतिः ७ प्रेक्षा ८ उपलब्धिः ९ चित् १० सम्वित् ११ प्रतिपत् १२ ज्ञप्तिः १३ चेतना १४। इत्यमरः। १।५।१॥ धारणा १५ प्रतिपत्तिः १६ मेधा १७ मननम् १८ मनः १९ ज्ञानम् २० बोधः २१ हृल्लेखः २२ संख्या २३ प्रतिभा २४। इति राजनिर्घण्टः॥ आत्मजा २५ पण्डा २६ विज्ञानम् २७। इति शब्दरत्नावली॥ * ॥ अस्याः स्वरूपं यथा,—

“बुद्धिर्विवेचनारूपा सा ज्ञानजननी श्रुतौ॥”

इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे २३ अध्यायः॥

अस्या अध्यात्माधिभूताधिदैवतानि यथा,—

“अध्यात्मं बुद्धिरित्याहुः षड़िन्द्रियविचारिणी।
अधिभूतञ्च मन्तव्यं ब्रह्मा तत्राधिदैवतम्॥”

इति महाभारते आश्वमेधिकपर्व्व॥ * ॥

सा च सात्त्विकराजसतामसभेदेन त्रिविधा। सात्त्विकी यथा,—

“प्रवृत्तिञ्च निवृत्तिञ्च कार्य्याकार्य्ये भयाभये।
बन्धं मोक्षञ्च या वेत्ति बुद्धिः सा पार्थ!
सात्त्विकी॥”

राजसी यथा,—

“यया धर्म्ममधर्म्मञ्च कार्य्यञ्चाकार्य्यमेव च।
अयथावत् प्रजानाति बुद्धिः सा पार्थ!
राजसी॥”

तामसी यथा,—

“अधर्म्मं धर्म्ममिति या मन्यते तमसावृता।
सर्व्वार्थान् विपरीतांश्च बुद्धिः सा पार्थ!
तामसी॥”

इति श्रीभगवद्गीता॥